"डिण्डिशो रोमशफलो मुनिनिर्म्मित इत्यपि ।
डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥")

डित्थः, पुं, काष्ठमयहस्ती । यथा, सुपद्मव्याकरणे विभक्तिपादे ।
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः ॥"
विशेषलक्षणयुक्तपुरुषः । यथा,—
"श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः ।
सर्व्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥"
इति कलापटीकाव्याख्यासारः ॥
(द्रव्यवाचिसंज्ञाशब्दभेदः । यथा, साहित्यदर्पणे । "द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः ॥")

डिप, इ क ङ ञ संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं च-सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । इ क ङ, डिम्पयते । ञ, डिम्पयति डिम्पयते । अयमात्मनेपदीत्यन्ये । संहती राशीकरणम् । इति दुर्गादासः ॥

डिप, क ङ ञ संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-उभं-च सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । क ङ, डेपयते । ञ, डेपयति डेपयते । पुनःपाठान्नेदनुबन्धः । अयमात्मनेपदीत्यन्ये । संहती राशीकरणम् । इति दुर्गादासः॥

डिप, शि क य इर् क्षुदि । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-दिवां च-सकं-सेट् ।) शि, डिपति अडिपीत् । क, डेपयति । य, डिप्यति । इर् अडिपत् अडेपीत् । तुदाद्यन्तर्गणस्यैव कुटादित्वमिति दिवादिपक्षे गुणः । दिवादिपक्षे पुषादित्वान्नित्यं ङ इत्यन्ये । क्षुदि प्रेरणे । इति दुर्गादासः ॥

डिब, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) मूर्द्धन्यवर्गतृतीयादिः । इ क, डिम्बयति । नोदः प्रेरणम् । इति दुर्गादासः ॥

डिभ, इ क ञ सङ्घे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) इ क ञ, डिम्भयति डिम्भयते । अयमात्मनेपदीति केचित् । सङ्घो राशीकरणम् । इति दुर्गादासः ॥

डिम, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) डिण्डिमः । सौत्रधातुरयम् । इति दुर्गादासः ॥

डिमः, पुं, नाटकस्य रूपकविशेषः । इति हेमचन्द्रः । २ । १९८ ॥ (तल्लक्षणादिकं यदुक्तं साहित्यदर्पणे । ६ । २४६ ।
"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातोऽतिवृत्तकः ॥
अङ्गो रौद्ररसस्तत्र सर्व्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥
नायका देवगन्धर्व्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोड़शात्यन्तमुद्धताः ।
वृत्तयः कौशिकीहीना निर्व्विमर्षाश्च सन्धयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्ज्जिताः ॥")

डिम्बं, क्ली, (डिम्ब+घञ् ।) भयम् । कललम् । फुप्फुसः । इति हारावली । २४४ ॥ डमरः । इत्यमरः । ३ । २ । १४ ॥

डिम्बः, पुं, (डिवि नोदे+भावे घञ् ।) भयध्वनिः । अण्डम् । फुप्फुसः । प्लीहा । विप्लवः । इति मेदिनी । वे, ५ ॥ डिम्भः । इति द्विरूपकोषः ॥

डिम्बाहवः, पुं, (डिम्बः नृपतिहीनत्वात् विप्लवमूल आहवः ।) नृपतिरहितयुद्धम् । इति जटाधरः ॥ (यथा, मनुः । ५ । ९५ ।
"डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च ॥"
"डिम्बाहवो नृपरहितयुद्धं तत्र हतानाम् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥)

डिम्बिका, स्त्री, (डिम्बयति नायकसमीपे नोदयत्यात्मानमिति । डिम्ब+ण्वुल् । टाप् अत इत्वञ्च ।) कामुकी । जलविम्बः । शोणकवृक्षः । इति शब्दरत्नावली ।

डिम्भः, त्रि, (डिम्भयति संहतो भवतीति । डिम्भ+पचाद्यच् ।) शिशुः । इत्यमरः ।२।५।३८॥ (यथा, रसिकरञ्जने । १ ।
"शुभारम्भेऽदम्भे मह्तिमतिडिम्भेङ्गितशतं ।
मणिस्तम्भे रम्भेचयासकुचकुम्भे परिणतम् ॥")
मूर्खः । इति मेदिनी । मे, ४ ॥ अस्य रूपान्तरं डिम्बः । इति द्विरूपकोषः ॥

डिम्भकः, त्रि, (डिम्भ एव । डिम्भ+स्वार्थे कन् ।) बालकः । इति शब्दरत्नावली ॥ (स्वनामख्यातः शाल्वदेशाधिपतेर्ब्रह्मदत्तस्य पुत्रः । यथा, हरिवंशे भविष्यपर्व्वणि । ३२ । १८ ।
"हंसो ज्येष्ठो नृपसुतो डिम्भकोऽनन्तरोऽभवत् ॥"
अस्य विशेषविवरणं तत्रैव विस्तरशो द्रष्टव्यम् ॥)

डिम्भचक्रं, क्ली, (डिम्भ इव चक्रम् ।) नराणां शुभाशुभनिर्णायकचक्रविशेषः । यथा,—
"डिम्भचक्रे न्यसेद्भानि भानुभादित्रिमस्तके ।
मुखे त्रीणि द्वयं स्कन्धे चैकैकं बाहुहस्तयोः ॥
हृदि पञ्च नाभिगुह्ये चैकैकं षट् च जानुनोः ।
चरणाभ्यां तथैकैकं जन्मर्क्षपतनात् फलम् ॥
शीर्षस्थे छत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम् ।
स्कन्धे धनी च बाहुभ्यां स्थानभ्रष्टो भवेन्नरः ॥
पाणिभ्यां तस्करो लक्ष्मीर्हृद्यायुश्च नाभितः ।
गुह्ये कामी भ्रमो जान्वोरल्पजीवी च पादयोः ॥"
इति स्वरोदयः ॥

डिम्भा, स्त्री, (डिम्भ+टाप् ।) अतिशिशुः । इत्यमरः । २ । ६ । ४१ ॥

डी, ओ ङ य गतौ । नभोगतौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं अकं च-सेट् ।) ओ, डीनः । ङ य, डीयते । इति दुर्गादासः ॥

डी, ङ नभोगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, डयते पक्षी । अस्यापि निष्ठायां डीनः । इति कातन्त्राद्याः । धातुपारायणिकास्तु इमृनिषेधे ओदनुबन्धडीङो ग्रहणादस्मादिमि वक्तव्याद्गुणे डयित इत्याहुः । गोयीचन्द्रोऽपि । डयितः डयितवान् इत्युदाजहार । स्मरति तु डीत इत्येव । इति दुर्गादासः ॥

डीनं, क्ली, (डी नभोगतौ+भावे क्तः ।) पक्षिगतिः । इति जटाधरः ॥ तद्भेदा यथा,—
"स्थानात् संपत्य निष्क्रम्य पक्षसम्पातमुच्यते ।
ऊर्द्धाधोगतिसम्बन्धः समुदीर्णं प्रचक्षते ॥
संकल्प्य पक्षगमनमुच्यते व्यतिरिक्तकम् ।
षड्विंशतिरमी भेदाः पातानामिह दर्शिताः ॥
महाडीनं विहायैषां पातानां त्रिविधा गतिः ।
गतं तत्र यथोद्दिष्टं आगतं पुनरागमः ॥
प्रत्यावृत्तिः प्रतिगतिरिति षट् सप्तभिः स्मृताः ।
तेषां निपाताः कथ्यन्ते प्रत्येकं पञ्चविंशतिः ॥"
तद्यथा । उड्डीनं ऊर्द्धगमनम् १ अवडीनं अधःपतनम् २ प्रडीनं पतनवेगवत्ता ३ डीनं पतनमात्रम् ४ निडीनं नीचैःपतनम् ५ संडीनं सम्यक्पतनम् ६ तिर्य्यग्डीनं तिर्य्यक्पतनम् ७ विडीनं विचित्रं पतनम् ८ परिडीनं सर्व्वतः पतनम् ९ पराडीनं परावृत्य गमनम् १० सुडीनं सुकुमारपातः ११ अभिडीनं आभिमुख्येन पुनः पुनः पतनम् १२ महाडीनं क्षुद्रपतनेन प्रत्यावृत्तिः १३ निडीनं भक्ष्यमाश्रयं वा पश्यतः पतनम् १४ अतिडीनं दीर्घपतनम् १५ अवडीनं अधःपतनम् १६ प्रडीनं अधःपतने वेगवत्ता १७ अवसंडीनं अधःपतने शोभनवत्ता १८ डीनडीनकं पतनं निर्व्विशेषणं कुत्सितञ्च १९ संडीनोड्डीनं शोभनमूर्द्धगमनम् २० संडीनडीनं शोभनगगनमात्रम् २१ पुनर्डीनं तदेव सामान्यगमनम् २२ डीनावडीनकं तदेवाधः कुत्सितञ्च २३ सम्पातं बहुभिः सह गमनम् २४ समुदीर्णं परस्परस्पर्द्धया गमनम् २५ ततोऽन्यत् व्यतिरिक्तकं तस्मात् साङ्केतादेत्यन्तेऽहस्तं पतनम् २६ । एतेषु षड्विंशतिसंख्येषु पतनं एकं डीननामकं निर्व्विशेषणं पतनमात्रं सविशेषणानि पतनानि पञ्चविंशतिसंख्यानि तत्र तानि सविशेषानि वक्ष्यमाणचतुर्भिर्व्विशेषणैर्व्विंशत्यानि इति शतं निर्व्विशेषञ्चैकमिति एकोत्तरं शतम् । तानि चत्वारि विशेषणानि यथा । गतं गमनमात्रम् । आमतं आगमनम् । प्रतिगतं गत्वैव पुनरागमनं आगत्यैव पुनर्गमनञ्च । इति महाभारते ।८।४१ अः ॥*॥ आगमशास्त्रविशेषः । यथा, मुण्डमालातन्त्रे ।
"डामरं डमरं डीनं श्रुतं काशीविलासकम् ।
सप्तकोटिमहाग्रन्था मम वक्त्राद्विनिर्गताः ॥"

डीनडीनकं, क्ली, (डी+भावे क्तः । ततः स्वार्थे कन् । डीनेन सह डीनकं निर्व्विशेषणं कुत्सितं वा पतनम् ।) पक्षिणां गतिक्रियाविशेषः । इति जटाधरः । अस्य विवरणं डीनशब्दे द्रष्टव्यम् ॥

डीनावडीनं, क्ली, (डीनेन सह अवडीनम् ।) पक्षिगतिविशेषः । तत्तु एकस्यां गतौ गत्यन्तरमिश्रणम् । अधःकुत्सितंगमनञ्च । इति महाभारते कर्णपर्व्वटीका ॥